प्राच्यां दिश्यमरप्रभुर्विजयते योऽनन्तशायी हरिः
सर्वेषां भजतामनन्तसुखदो योऽनन्तसंज्ञामगात् ।
देशाद्यन्तविवर्जितश्च सततं शेषाङ्गशय्याप्रियो
यस्याः सा विजयाभिधा दिशतु वो
दुर्गा सदा मङ्गलम् ।।१।।

आशायामनलस्य शक्तिरपरा या दैत्यविध्वंसिनी
देवानां त्रिदशद्विषां समरजं वैरं यया शमितम् ।
शान्तेति प्रथिता शिवाय जगतां भक्तेष्टसिद्धिप्रदा
यस्याः सा विजयाभिधा दिशतु वो
दुर्गा सदा मङ्गलम् ।।२।।

यम्यां तिष्ठति पुण्डरीकनयनो नारायणः सायुधो
यः पापौ मधुकैटभौ निहतवान् मायासहायः स्वयम् ।
सोऽयं ब्रह्मविदां परात्परतरः कल्पद्रुमः कामिनां
यस्याः सा विजयाभिधा दिशतु वो
दुर्गा सदा मंगङ्लम् ।।३।।

नैर्ऋत्यां दिशि शङ्करो वितनुते हृद्यां परां सम्पदां
विद्यां चापि ददाति सर्वहजगतामिच्छानुकूलः प्रभुः ।
शुक्लत्वात्कपिलेश्वरोऽयमथवा सत्त्वाधिपो दैवतो
यस्याः सा विजयाभिधा दिशतु वो
दुर्गा सदा मङ्गलम् ।।४।।

या देवी सुरपूजिताऽसुरगणं संमोहयन्ती बहु-
व्याजैः साधु सुधामपाययदसौ देवान् सुरां दानवान् ।
सा चैकार्थपरा परात्परतरा वर्वर्ति पश्चाच्छिवा
यस्याः सा विजयाभिधा दिशतु वो
दुर्गा सदा मङ्गलम् ।।५।।

वायव्यां दिशि राजते पुरहरो यः सप्तकोटीश्वरो
देवैः सर्षिगणैः समाश्रित इति प्रख्यातकीर्तिर्भुवि ।
लोकानामवनाय निर्गुणवपुः सद्योऽभवत्संमुखो
यस्याः सा विजयाभिधा दिशतु वो

दुर्गा सदा मंङ्गलम् ।।६।।

यन्नामस्मरणान्निवृत्तविषयाः सर्वेऽपि मुक्ता नराः
क्षेत्रे विठ्ठलसंज्ञके तदधिपो दत्त्वा स्वकीयं पदम् ।
आगत्योत्तरतः स्वभक्तविषयात् श्रीपाण्डुरङ्गः स्थितो
यस्याः सा विजयाभिधा दिशतु वो
दुर्गा सदा मंङ्गलम् ।।७।।

ईशान्यां कमलं विभाति विमलं यस्मिन्सरस्तच्छुभम्
यस्याम्भस्यनुवत्सरं भगवतीयत्रोत्सवो दृश्यते ।
लोकै रम्यतमः सहःसितदशम्यां मोदमानान्तरैर्
यस्याः सा विजयाभिधा दिशतु वो

दुर्गा सदा मङ्गलम् ।।८।।

दिक्ष्वष्टासु परिक्रमो विजयते, संस्तूयते, नन्द्यते
मर्त्यामर्त्यमुनीन्द्रसिध्दवदनैर्दिग्लोकपालैरपि ।
भक्तापध्दरणैककर्मचतुरो विश्वावनायाऽदृतो
यस्याः सा विजयाभिधा दिशतु वो
दुर्गा सदा मङ्गलम् ।।९।।

।। इति श्री विजयादुर्गा मङ्गलाष्टकम् ।।


श्री विजयादुर्गा संस्थान
केरी, फोंडा–गोवा